श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ वक्षस्स्थलावस्थानस्तबकः तृतीयः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ वक्षस्स्थलावस्थानस्तबकः तृतीयः ॥

श्रये शेषाचलमणेः शार्ङ्गिणो हृदयङ्गमाम्।
अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम्॥ 3.1 ॥

कल्याण दिव्य करुणादि गुणाम्बुराशे
    काङ्क्षाधिकाभ्युदयदायिकटाक्षलेशे।
भद्राय दैत्यजिदुरःकृतनित्यवासे
    भक्तिस्थिरेण मनसा भवतीमुपासे॥ 3.2 ॥

नालीकसम्भवभवादिसुराभिवन्द्ये
    नानाविधाकृतक वाङ्मय मौळिवेद्ये।
पाथोधिपुत्रि पतिवक्षसि नित्यहृद्ये
    भान्तीमनन्यशरणो भवतीं प्रपद्ये॥ 3.3 ॥

शय्यागृहं तव पिता जगतां नियन्तुः
    भ्राता दृगेक इतरः पुनरङ्गभूषा।
वक्षस्यमुष्य वरदे त्वमवस्थिता तत्
    वाल्लभ्यमम्ब भवदीयमनन्यलभ्यम्॥ 3.4 ॥

भ्रातुर्विधोर्वसुसमृद्ध्यसहेषु पद्मे -
    ष्वास्ते रमेत्यपयशः प्रशमाय नूनम्।
सोदर्यकौस्तुभशुभावहमब्धिकन्ये
    वक्षस्त्वमावससि वेङ्कटनायकस्य॥ 3.5 ॥

भगवतः प्रतिघो हृदि मा स्म भूत्
    समुदयद्वृजिनेषु जनेष्विति।
अवहिता जगदम्ब हिताय नो
    हृदयमेव हरेरधितिष्ठसि॥ **3.6**॥

फणिशैलपतेस्त्वमिन्दिरे
    भवसि प्राणसमेति साम्प्रतम्।
अमुना भवती यतः स्वयं
    हृदये प्राणपदे निवेशिता॥ **3.7**॥

उरगाद्रिपतेरुरःस्थलस्था
    कमले तद्गलशङ्खगर्भमुक्तैः।
शुचिहारमहः सुरस्रवन्ती
    सलिलैरम्ब सदाऽभिषिच्यसे त्वम्॥ **3.8**॥

कुमारि क्षीराब्धेः कुसुमसुकुमाराङ्गि भवती
    नवं पद्मं सद्म म्रदिम रमणीयं विजहती।
शरण्ये त्रातुं नः शरकिणघनं कौस्तुभशिला -
    कठोरं गाढोरः श्रयसि कृपया कैटभरिपोः॥ **3.9**॥

श्रीवत्साङ्कं चिरतरमुरः सीमगोष्ठं मुरारेः
    अध्यासीनामनघहरितोदारकान्त्याभिरामम्।
कल्याणि त्वां सुलभममृतं संश्रितानां दुहानां
    क्षीराम्भोधेः समुदितवतीं ब्रूमहे कामधेनुम्॥ **3.10**॥

विश्वातीतो जयति वृजिनह्रासदे वासुदेवः
    पद्मे तस्याप्युपरि महिमा भासते तावकीनः।
क्षेत्रज्ञानां हृदयमनिशं कञ्जनाभोऽधिशेते
    तस्यापि त्वं हृदि हृततमोराजसे राजसे यत्॥ **3.11**॥

वीक्षन्ते ये वेङ्कटक्ष्माभृदिन्दोः
    सूरस्थाने शोभमानामिह त्वाम्।
दुग्धोदन्वत्पुत्रि दिव्यं पदं ते
    सूरस्थानं हन्त भित्वा विशन्ति॥ **3.12** ॥

बलिवसुमुषः प्रहर्षा -
    दुच्चोरस्थलमुपेत्य कमले त्वम्।
अस्माकमपथगानां
    हरसे चिरकालसञ्चितानर्थान्॥ **3.13** ॥

शशिलेखा भवती च
    श्रीरब्धेरुद्गते तयोराद्या।
धारयति कृष्णमन्तः
    कृष्णेनान्तस्तु धार्यते चरमा॥ **3.14** ॥

वनमालाया मुषितां
    विश्वविभोर्भुजतमालविटपान्तः।
कामपि कनकलतां त्वां
    कलशाकूपारकन्यके मन्ये॥ **3.15** ॥

परमतुलसीतमनघे
    वनमालाप्तं सुलक्ष्मणाकलितम्।
कलयसि सद्रूपयुतं
    कमले वक्षो हरेर्महारामम्॥ **3.16** ॥

दृष्टात्मप्रतिबिम्बितेषु मणिषु द्रागिन्दिरे मा स्म भूत्
    अन्तःस्थेष्वबलान्तरस्थितिधिया कोपस्तवेत्यच्युतः।
शङ्कोन्मेषकथापथातिपतितं सन्त्यक्तरत्नान्तरः
    तं त्वत्सोदरमेव कौस्तुभमणिं धत्ते भुजाभ्यन्तरे॥ **3.17** ॥

सस्नेहपूर्तिरुदितत्रिदशोपसेवः
    दीप्तो हरेरुरसि देवि तवेष्टगेहे।
अस्माकमान्तरतमः प्रशमय्य मुक्तेः
    मार्गं प्रकाशयतु कौस्तुभरत्नदीपः॥ **3.18** ॥

सरसिजनिलयापि वैभवेन
    स्फुरसि निरेनसि मानसे मुनीनाम्।
उरसि मुररिपोरुपोढहारे
    शिरसि च देवि गिरां पुरातनीनाम्॥ **3.19** ॥

शुभश्रीवत्साङ्कं शुचिरुचिरहारं मुररिपोः
    तमालाभं वक्षस्तरलवनमालासुरभिलम्।
परिष्कुर्वाणां त्वां भवजलधिशोषाय कलये
    जगन्मातः प्रातस्तनजलजदायादवदनाम्॥ **3.20** ॥

प्राचीनवाक्परिषदां परतत्त्वचिन्तां
    व्यालेन्द्रभूधरपतिर्व्यपनेतुकामः।
कान्तो बिभर्ति भवतीं कलशाब्धिकन्ये
    भूषाविशेषमिव देवि भुजान्तराले॥ **3.21** ॥

स्वभावादुन्मीलद्बकुलसुमनः कोमलतनोः
    तव क्लेशाशङ्काकुलितहृदयेनापि हरिणा।
त्वदाक्रान्ते हन्त व्युदसितुमुरस्यम्ब पुलका
    न शक्यन्ते पद्मे न खलु सुलभः कण्टकजयः॥ **3.22** ॥

निरत्ययं नीलमहोनिधानं
    कान्तं मुकुन्दाभिधमिन्दिरे त्वम्।
निरञ्जनैरेव जनैर्गृहीतं
    वीक्ष्य स्थिता वक्षसि रक्षितुं किम्॥ **3.23** ॥

जननि पुष्यसि तामरसं पदं
    वितनुषे च नतामरसंपदम्।
परमुरस्फुरणप्रतिरोधिनं
    परमुरः स्फुरणं नयसेऽद्भुतम्॥ **3.24** ॥

यदि नाम विष्णुवक्षः
    क्षणमत्यक्षः क्षमामयि रमे त्वम्।
आगस्विनस्तदा नो
    नैवारक्षिष्यदूष्मलो नाथः॥ **3.25** ॥

हृदये कमलदलाक्षि
    त्वत्पदलाक्षीयलक्ष्म भवतीं च।
दधदूष्मलोऽपि कृष्णो -
    ऽप्यधिकारुण्यं वहत्यहिगिरीशः॥ **3.26** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे वक्षस्स्थलावस्थानस्तबकः तृतीयः॥